ಒಟ್ಟು ಮುದ್ರಿತ ಪುಟಗಳ ಸಂಖ್ಯೆ : 12 ]
Total No. of Printed Pages : 12 ]

ಒಟ್ಟು ಪ್ರಶ್ನೆಗಳ ಸಂಖ್ಯೆ : 59 ]
Total No. of Questions : 59 ]

**ಸಂಕೇತ ಸಂಖ್ಯೆ: 16-S**

**Code No. : 16-S**

# D

**CCE PR**
**UNREVISED**
**REDUCED SYLLABUS**
**NSR & NSPR**

Question Paper Serial No. **813**

## ವಿಷಯ : ಪ್ರಥಮ ಭಾಷೆ — ಸಂಸ್ಕೃತ
## Subject : First Language — SANSKRIT
## प्रथमभाषा — संस्कृतम्

**(ಪುನರಾವರ್ತಿತ ಖಾಸಗಿ ಅಭ್ಯರ್ಥಿ / ಎನ್.ಎಸ್.ಆರ್. & ಎನ್.ಎಸ್.ಪಿ.ಆರ್.)**
**(Private Repeater / NSR & NSPR)**

ದಿನಾಂಕ : 12. 06. 2023 ] [ Date : 12. 06. 2023
ಸಮಯ : ಬೆಳಗ್ಗೆ 10-30 ರಿಂದ ಮಧ್ಯಾಹ್ನ 1-45 ರವರೆಗೆ ] [ Time : 10-30 A.M. to 1-45 P.M.
ಗರಿಷ್ಠ ಅಂಕಗಳು : 125 ] [ Max. Marks : 125

### *ಪರೀಕ್ಷಾರ್ಥಿಗಾಗಿ ಸಾಮಾನ್ಯ ಸೂಚನೆಗಳು :*

1. ಈ ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯು ವಸ್ತುನಿಷ್ಠ ಮತ್ತು ವಿಷಯನಿಷ್ಠ ಮಾದರಿಯ 59 ಪ್ರಶ್ನೆಗಳನ್ನು ಹೊಂದಿದೆ.
2. ಈ ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯನ್ನು ಹಿಮ್ಮುಖ ಜಾಕೆಟ್ ಮೂಲಕ ಮೊಹರು (ಸೀಲ್) ಮಾಡಲಾಗಿದೆ. ಪರೀಕ್ಷೆ ಪ್ರಾರಂಭವಾಗುವ ಸಮಯಕ್ಕೆ ನಿಮ್ಮ ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯ ಬಲಬದಿ ಪಾರ್ಶ್ವವನ್ನು ಕತ್ತರಿಸಿ, ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯಲ್ಲಿ ಎಲ್ಲಾ ಪುಟಗಳು ಇವೆಯೇ ಎಂದು ಪರೀಕ್ಷಿಸಿಕೊಳ್ಳಿ.
3. ವಸ್ತುನಿಷ್ಠ ಮತ್ತು ವಿಷಯನಿಷ್ಠ ಮಾದರಿಯ ಪ್ರಶ್ನೆಗಳಿಗೆ ಕೊಟ್ಟಿರುವ ಸೂಚನೆಗಳನ್ನು ಪಾಲಿಸಿ.
4. ಬಲ ಭಾಗದಲ್ಲಿ ಕೊಟ್ಟಿರುವ ಅಂಕಿಗಳು ಪ್ರಶ್ನೆಗಳಿಗಿರುವ ಪೂರ್ಣ ಅಂಕಗಳನ್ನು ತೋರಿಸುತ್ತವೆ.
5. ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯನ್ನು ಓದಿಕೊಳ್ಳಲು 15 ನಿಮಿಷಗಳ ಕಾಲಾವಕಾಶವು ಸೇರಿದಂತೆ, ಉತ್ತರಿಸಲು ನಿಗದಿಪಡಿಸಲಾದ ಸಮಯವನ್ನು ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯ ಮೇಲ್ಭಾಗದಲ್ಲಿ ಕೊಡಲಾಗಿದೆ.

### *परीक्षार्थिनां सामान्यसूचनाः*

1. अस्मिन् प्रश्नपत्रे वस्तुनिष्ठाः विषयनिष्ठाश्च नवपञ्चाशत् (59) प्रश्नाः सन्ति ।
2. इदं प्रश्नपत्रं विपरीतेन आवरणेन मुद्रिताङ्कमस्ति । परीक्षासमये प्रश्नपत्रमुद्घाटयितुं दक्षिणपार्श्वेन कर्तयत । प्रश्नपत्रस्य पृष्ठानि पूर्णानि सन्ति वा इति अवलोकयत ।
3. विषयनिष्ठानां वस्तुनिष्ठानाञ्च प्रश्नानां विषये निर्दिष्टाः नियमाः अनुपालनीयाः ।
4. प्रश्नानां प्रति अधिकृताः अङ्काः पार्श्वे लिखिताः सन्ति ।
5. प्रश्नपत्रमुत्तरयितुं निर्धारितः समयावधिः प्रश्नपत्रस्य उपरि भागे लिखितः अस्ति । पञ्चदशनिमेषाः प्रश्नपत्रस्य पठनार्थं निर्धारिताः सन्ति ।

इतः कर्तयत

**TEAR HERE TO OPEN THE QUESTION PAPER**
**प्रश्नपत्रमुद्घाटयितुम् इतः कर्तयत**

**Tear here**

**I. अधोलिखितेभ्यः प्रश्नेभ्यः चत्वारः विकल्पाः प्रदत्ताः । तेषु समुचितं विकल्पं चित्वा क्रमाक्षरेण सह लिखत ।** **10 × 1 = 10**

1. 'जलम्' अस्य समानार्थकपदम् इदं भवति ।

   (A) कूपः (B) भूपः

   (C) आपः (D) चापः

2. 'चरः' अस्य विरुद्धार्थकपदम् इदं भवति ।

   (A) आचारः (B) सुचरः

   (C) विचारः (D) अचरः

3. 'योगी' अस्य स्त्रीलिङ्गरूपम् इदं भवति ।

   (A) योगः (B) योगिनी

   (C) योगिः (D) योगा

4. 'प्रावर्तत' अत्र एषः लकारः वर्तते ।

   (A) लृट्लकारः (B) लिट्लकारः

   (C) लोट्लकारः (D) लङ्लकारः

5. 'चेष्टया' अत्र एषा विभक्तिः वर्तते ।

   (A) तृतीयाविभक्तिः (B) द्वितीयाविभक्तिः

   (C) प्रथमाविभक्तिः (D) सप्तमीविभक्तिः

6. उपनिषदः <u>शतशः</u> सन्ति । अत्र रेखाङ्कितपदस्य समुचितं प्रश्नवाचकपदम् इदं भवति ।

(A) कदा (B) कति

(C) कथम् (D) कुत्र

7. 'भक्तस्सेवते' अत्र एषः सन्धिः वर्तते ।

(A) विसर्गसन्धिः (B) श्चुत्वसन्धिः

(C) गुणसन्धिः (D) यण्सन्धिः

8. 'प्रजाहितम्' अत्र एषः समासः भवति ।

(A) कर्मधारयसमासः (B) अव्ययीभावसमासः

(C) बहुव्रीहिसमासः (D) तत्पुरुषसमासः

9. भक्तः देवालयम् आगत्य प्रणमति । अत्र कृदन्तपदम् इदं भवति ।

(A) भक्तः (B) देवालयम्

(C) आगत्य (D) प्रणमति

10. अत्र व्याकरणशुद्धवाक्यम् इदं भवति ।

(A) नगरस्य बहिः उद्यानम् अस्ति ।

(B) नगरात् बहिः उद्यानम् अस्ति ।

(C) नगरेण बहिः उद्यानम् अस्ति ।

(D) नगरे बहिः उद्यानम् अस्ति ।

**II. चतुर्थं पदं लिखत ।** **5 × 1 = 5**

11. मोघलचक्रवर्ती – औरङ्गजेबः :: महाराज्ञी – ........................।

12. दाडिमः – द्रुमः :: नागवल्ली – ........................ ।

13. शचीपति – इन्द्रः :: अञ्जनापतिः – ........................... ।

14. भूपालः – उत्तानपादः :: सर्वलोकशरण्यः – ........................... ।

15. अञ्जनासुतः – आञ्जनेयः :: सिंहिकासुतः – ........................ ।

**III. एकवाक्येन उत्तरं लिखत ।** **8 × 1 = 8**

16. इन्द्रः कस्य तपोवनं वव्राज ?

17. सर्वोऽपि जीवराशिः कस्मात् बलं प्राप्नोति ?

18. केळदीराज्यस्य महाराज्ञी का ?

19. केषां विभूतयः परोपकाराय भवन्ति ?

20. केसरी कुत्र राज्यं पालयतिस्म ?

21. ध्रुवः नारायणं साक्षात्कर्तुं कुत्र प्रस्थितः ?

22. भरतखण्डः तिसृषु दिक्षु कैः आवृतः ?

23. दुःखितः ध्रुवः कस्याः समीपम् अगच्छत् ?

**IV. द्वित्रैः वाक्यैः उत्तरं लिखत ।** **7 × 2 = 14**

24. तैत्तिरीये सूर्यस्य विषये किं लिखितमस्ति ?

25. बुद्धिसागरः मुञ्जं किं प्राह ?

26. कीदृशं पुरुषं लक्ष्मीः निवासहेतोः स्वयं याति ?

27. कौ अमरत्वं प्राप्तवन्तौ ? तौ दग्धुं कः इच्छति ?

28. अस्थियाचकम् इन्द्रं दधीचिः सानन्दम् किम अवदत् ?

29. भोजस्य जन्मपत्रिकां दृष्ट्वा दैवज्ञः किमाह ?

30. नरस्य वृत्तं के के जानन्ति ?

**V. सूचनानुसारम् उत्तरं लिखत ।** **6 × 2 = 12**

31. सन्धिं विभज्य नाम लिखत ।

 a) मुनिरिति ।

 b) चराचरम् ।

32. विग्रहवाक्यं विलिख्य समासनाम लिखत ।

 a) चक्रपाणिः ।

 b) केळदीराज्यम् ।

**अथवा**

समासं कृत्वा समासनाम लिखत ।

 a) क्रमम् अनतिक्रम्य =

 b) अन्यः देशः =

33. वाक्ये विद्यमानं कृदन्तपदं चित्वा प्रत्ययस्य नाम लिखत ।

a) बालः पुस्तकं क्रीत्वा पठति ।

b) सेवकः ग्रामं गतवान् ।

34. वाक्यदोषं परिहरत ।

a) बालकः चोरेण बिभेति ।

b) शिक्षकस्य सह छात्रः गच्छति ।

35. लकार-पुरुष-वचनानि लिखत ।

a) बभूव ।

b) भविष्यति ।

36. लिङ्ग-विभक्ति-वचनानि लिखत ।

a) नायिकाम् ।

b) उद्यमे ।

**VI. संस्कृतभाषया अनुवादं कुरुत ।** **1 × 2 = 2**

37. ವಿದ್ಯಾರ್ಥಿಗಳು ಪ್ರತಿದಿನವೂ ಶಾಲೆಗೆ ಬರುತ್ತಾರೆ. ಅಲ್ಲಿ ಮಿತ್ರರೊಂದಿಗೆ ಪಾಠಗಳನ್ನು ಓದುತ್ತಾರೆ.

Students come to school everyday. There they learn lessons along with their friends.

**VII. कर्नाटकभाषया, आङ्ग्लभाषया वा अनुवादं कुरुत । 1 × 2 = 2**

38. उद्योगः मानवस्य प्रमुखं लक्षणम् । उद्योगेन एव सर्वाणि कार्याणि फलन्ति ।

**VIII. यथानिर्देशम् उत्तरं त्रिचतुरैः वाक्यैः लिखत । 5 × 3 = 15**

39. किन्तु भवन्तं परिश्रान्तं पश्यामि ।

कः पाठः ? का अवदत् ? अत्र परिश्रान्तः कः ?

40. सहसा वह्निमाविश ।

कः पाठः ? के ऊचुः ? कम् ऊचुः ?

**अथवा**

सः महर्षिः धर्मात्मा उदारश्च ।

कः पाठः ? कः अवदत् ? धर्मात्मा कः ?

41. "लीलावती इति ग्रन्थे बहवः विषयाः निरूपिताः खलु ।"

कः पाठः ? का वदति ? कस्य ग्रन्थः एषः ?

42. जग्राह सहसा रविम् ।

कः पाठः ? कः अवदत् ? कम् अवदत् ?

43. किं वा भवेत् ? मम समीपे ।

कः पाठः ? कः अवदत् ? कम् अवदत् ?

**IX. कवेः देश-काल-कृतीनां विषये त्रिचतुरैः वाक्यैः उत्तरं लिखत ।** **3 × 3 = 9**

44. बल्लालसेनः ।

45. वाल्मीकिः ।

46. डा० के०एस्० नागराजन् ।

**X. पद्यपाठस्य नाम उल्लिख्य तात्पर्यं पञ्चषैः वाक्यैः कर्नाटकभाषया, संस्कृतभाषया, आङ्ग्लभाषया वा लिखत ।** **4 × 3 = 12**

47. एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा ।
कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्च ।।

48. यत्र कुत्र वा वयं समग्रभारते स्थिता
भाषयापि धर्मतश्च भिन्नमार्गमाश्रिताः ।
आदितश्च मध्यतस्तथान्ततश्च भारता
भारतीयभावनेति वृद्धिमेतु भारते ।।

**अथवा**

शैलशृङ्गवासिनीं कृपाकटाक्षशालिनीं
मङ्गलाङ्गशोभितां चराचरादिनायिकाम् ।
वल्लकीप्रभूतदिव्यभव्यगानतोषिणीं
राजराजपूजितां सदा नमामि मातरम् ।।

49. सूर्यदत्तवरः स्वर्णः सुमेरुर्नाम पर्वतः ।

यत्र राज्यं प्रशास्त्यस्य केसरी नाम वै पिता ।।

50. तदोद्यन्तं विवस्वन्तं जपापुष्पोत्करोपमम् ।

ददर्श फल्लोभाच्च ह्युत्पपात रविं प्रति ।।

**XI. वाक्ये विद्यमानम् अलङ्कारं सलक्षणं समन्वयत । 1 × 3 = 3**

51. सैन्धवमानय ।

**अथवा**

कमलमिव चारु वदनम् ।

**XII. प्रस्तारं विलिख्य गणविभागं कृत्वा छन्दोनाम लिखत । 1 × 3 = 3**

52. दूरीकरोति कुमतिं विमलीकरोति ।

**XIII. पद्यं पूरयत । 1 × 4 = 4**

53. मनीषिणः ..........................................................................

..........................................................................................।

..........................................................................................

.......................................................................... दुर्लभम् ॥

**XIV. दशवाक्यैः उत्तरं कर्नाटकभाषया, संस्कृतभाषया, आङ्ग्लभाषया वा लिखत ।**

**3 × 4 = 12**

54. तपोधनः दधीचिः त्यागधनः कथं संवृत्तः ? पाठानुगुणं सङ्गृह्य लिखत ।

55. मारुतेः जननं बाल्यवृत्तान्तं च अगस्त्यमुनिः कथम् अवर्णयत् इति पद्यानुगुणं लिखत ।

56. ''भारतं संरक्षितुं सन्नद्धः योद्धा हिमवान्'' कथम् ? इति पाठानुगुणं विवृणुत ।

**अथवा**

अमरनाथ गुहाविषये का पुराणकथा अस्ति ?

**XV. अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नान् उत्तरत ।** **1 × 4 = 4**

57. अस्माकं कर्नाटकराज्ये प्रसिद्धानि तीर्थक्षेत्राणि ऐतिहासिकस्थानानि विराजन्ते । तेषु 'सांस्कृतिकराजधानी' इति प्रसिद्धं मैसूरुनगरमपि अन्यतमम् । नगरेऽस्मिन् विशालं सुन्दरं च राजभवनं वर्तते । नगरस्य अनतिदूरे एव पर्वतस्योपरि चामुण्डेश्वरीदेव्याः मन्दिरं सुशोभते । प्रतिवर्षम् आश्वयुजमासस्य प्रथमदिनादारभ्य दशमीपर्यन्तं विश्वविख्यातः दसरामहोत्सवः प्रचलति । दसरा उत्सवसमये मैसूरूनगरं तथा राजभवनं विद्युद्दीपैः अलङ्कुर्वन्ति । विजयदशमीदिने गजेन्द्रारूढायाः चामुण्डाम्बायाः उत्सवः नयनमनोहरः भवति । उत्सवं वीक्षितुं देश-विदेशेभ्यः जनाः अत्र आगच्छन्ति। उत्सवं दृष्ट्वा महान्तम् आनन्दम् अनुभवन्ति ।

**प्रश्नाः**

i) मैसूरुनगरं किमिति प्रसिद्धम् अस्ति ?

ii) दसरामहोत्सवः कदा प्रचलति ?

iii) चामुण्डेश्वरीदेव्याः मन्दिरं कुत्र सुशोभते ?

iv) दसरा उत्सवसमये किं किं विद्युद्दीपैः अलङ्कुर्वन्ति ?

**XVI. पत्रं लिखत ।** **1 × 5 = 5**

58. तुमकूरुमण्डलस्य सर्वकारीयप्रौढशालायाः छात्रः/छात्रा इति मत्वा 'मेघदूतम्' इति पुस्तकं प्रेषयितुं निवेद्य मैसूरुनगरस्य चेतनापुस्तकालयस्य व्यवस्थापकं प्रति आवेदनपत्रं लिखत ।

**अथवा**

कुलदेवतायाः रथोत्सवनिमित्तं दिनत्रयस्य विरामं सम्प्रार्थ्य मुख्यशिक्षकं प्रति विरामपत्रं लिखत ।

**XVII. दशवाक्यैः प्रबन्धं लिखत ।** **1 × 5 = 5**

59. स्वातन्त्र्योत्सवः ।

**अथवा**

परिसरसंरक्षणम् ।